# अद्वैतशास्त्रपरिचयः

अमितकुमारदे

कस्त्वं कोऽहं कुत आयातः, कुत आजाता कुत इयं विसृष्टिः इत्यादिप्रश्नानां उत्तरानुसन्धानरतैः भारतीयाखिलदार्शनिकैः जगज्जीवबन्धमोक्षादिविषये यथाप्रतिभं स्वस्वमतानि प्रोक्तानि। अतः भारतीयदर्शनशास्त्राकाशे नक्षत्राणि इव बहूनि दर्शनानि विद्यन्ते। दार्शनिकेषु ये वेदप्रामाण्यम् ईश्वरस्य अस्तित्वं च अङ्गीकुर्वन्ति, ते आस्तिकाः तेषां दर्शनम् आस्तिकदर्शनम् पुनश्च, ये वेदप्रामाण्यम् ईश्वरस्य अस्तित्वं च नाङ्गीकुर्वन्ति ते नास्तिकाः, तेषां दर्शनं नास्तिकदर्शनम्। संस्कृतवाङ्मये षडास्तिकदर्शनं नास्तिकदर्शनत्रयं च प्रसिद्धम्। क्रमानुसारं सर्वेषां दर्शनानां परिचयं कारयिष्यामः दीपशिखाया पुटेषु वयम् इति सङ्कल्पः। वेदान्तस्य परिचयः- दर्शनेषु वेदान्तदर्शनं भारतीयाध्यात्मशास्त्रस्य चरमो विकासः। वेदस्यान्तः सिद्धान्तो वेति विशिष्टार्थे वेदान्तशब्दस्य प्रयोगः। अन्तपदेन सारभागः इत्यर्थः बोद्धव्यः, यतो हि वेदस्य सारभूतांशः वेदान्ते वर्णितमस्ति। यथोक्तं-

> निःश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः।
> तिलेषु तैलवद्वेदे वेदान्त सुप्रतिष्ठितः॥

वेदान्तस्य परिचयार्थं सदानन्दयोगीन्द्रेण वेदान्तसारे उक्तं- "वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारिणी शारीरकसूत्रादीनि च।" मुख्यतया उपनिषदेव वेदान्तत्वेन गृह्यन्ते सर्वैवेदान्तिभिः। उपनिषत्प्रतिपादितश्रुतिरेव वेदान्तस्य चरमप्रमाणम्। वेदान्तशास्त्रे प्रसिद्धं प्रस्थानत्रयं- श्रुति-स्मृति-सूत्रप्रस्थानं चेति। तत्र श्रुतिप्रस्थानत्वेन उपनिषदः, स्मृतिप्रस्थानत्वेन श्रीमद्भगवद्गीतायाः किञ्च, सूत्रप्रस्थानत्वेन शारीरकसूत्रस्य ब्रह्मसूत्रस्य वा प्रसिद्धिः।

वेदान्तिभिः स्वानुभवानुसारं स्वप्रतिभानुसारं वा उपनिषत्प्रतिपादिततत्त्वं बहुधा प्रपञ्चितम्। ब्रह्मणः नित्यत्वे सत्यत्वे पारमार्थिकत्वे यद्यपि नास्ति कस्यापि भिन्नमतिः किन्तु जीवस्य ईश्वरस्य जगतः वा स्वरूपविषये वेदान्तिनां मतपार्थक्यं दृश्यते। तस्मात् वेदान्तशास्त्रेऽपि सिद्धान्तभेदाद् भवति मतभेदः।

| नाम | सिद्धान्तः |
|---|---|
| शङ्कराचार्यः | अद्वैतम् |
| भास्करः | भेदाभेदः |
| रामानुजः | विशिष्टाद्वैतम् |
| मध्वः | द्वैतम् |
| निम्बार्कः | द्वैताद्वैतम् |
| श्रीकण्ठः | शैवविशिष्टाद्वैतम् |
| वल्लभः | शुद्धाद्वैतम् |
| रामानन्दः | रामानन्दीयम् (विशिष्टाद्वैतस्य प्रकारः) |
| बलदेवः | अचिन्त्यभेदाभेदः |

एवमन्येऽपि केचन अर्वाचीनाः सम्प्रदाया अपि प्रसिध्यन्ति। सम्प्रति वयम् अद्वैतवेदान्तस्य चर्चां प्रसारयामः। अद्वैतवेदान्तदर्शनानुसारं "सर्वं खल्विदं ब्रह्म", "ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः"। तत्र वयं क्रमशः अद्वैतमते ब्रह्म-जीव-जगदादीनां पदार्थानां स्वरूपं पश्यामः।

## ब्रह्म

अस्ति अस्मिन् जगति निर्विकल्पोपाधिरहिता निर्विकारा एका सत्ता या ब्रह्म इत्युच्यते। "बृहत्त्वाद् बृंहणत्वाद्वा आत्मैव ब्रह्मेति गीयते"। श्रुतौ हि अस्ति ब्रह्मणः सगुणनिर्गुणरूपयोरुभयोः पर्याप्तविवेचनम्। शङ्कराचार्यस्य मते सगुणं ब्रह्म मायासंवलितं व्यावहारिकम् उपास्यं जगत्कारणं चेति, किन्तु निर्गुणं ब्रह्म पारमार्थिकं विद्यते। निर्गुणब्रह्मविषये उपनिषदि आम्नातम्-

> अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् (कठोपनिषत्-१।३।१५)।
> यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
> तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

"सत्यं ज्ञानमनन्तं ब्रह्म" इति ब्रह्मणः स्वरूपलक्षणम्। सच्चिदानन्दं हि ब्रह्मणः यथार्थस्वरूपम्। इदमेव ब्रह्म मायासंवृतं सत् सगुणं ब्रह्म इत्यभिधीयते। तदेव जगत्कारणमपि भवति। सृष्टिव्यापारस्तस्य लीलामात्रम्। सर्वकामस्य सर्वज्ञस्य ब्रह्मणः सृष्टिविधौ न किमपि प्रयोजनमस्ति। तत्रेश्वरो जगत्कारणमिति न्यायविद आमनन्ति। अद्वैतवेदान्ते तु ब्रह्मैव जगतः

उपादाननिमित्तोभयकारणमिति सिद्धम्।

तत्र ब्रह्ममीमांसायामस्ति शङ्कररामानुजयोर्वैमत्यम्। तथाहि ब्रह्म सजातीयविजातीयस्वगतभेदशून्यमिति शङ्करः, सजातीय-विजातीयभेदरहितोऽपि ईश्वरो न स्वगतभेदरहित इति रामानुजो मन्यते।

मोक्षं प्रति कारणं ब्रह्मज्ञानमेव। तथैवोक्तं शङ्करेण-

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम्।
येनाद्वितीयमानन्दं ब्रह्म सम्पद्यते बुधैः॥

अनुवर्तिष्यते...

